0083865
GOVT. BRENNEN COLLEGE CENTRAL LIBRARY THALASSERY



Reg. No. : ..............................

Name : ..................................

**III Semester B. A. Degree (CBCSS - Reg./Sup./Imp.) Examination, November 2019**
**(2017 Admn. Onwards)**
**CORE COURSE IN SANSKRIT**
**3B04 SKT : KHANDAKAVYA**

Time : 3 Hours                                                  Max. Marks : 40

Answers may be written either in Sanskrit or in English. In writing Sanskrit, Devanagari script should be used.

**I.** वाक्येन वाक्याभ्यां वा **अष्ट** उत्तरयत। **(8 × 1 = 8)**

Answer any **Eight** in one or two sentences.

1. दशरुपकाणि नामतः लिखत।
2. कालिदासविरचितं काव्यद्वयं नामतः निर्दिशत।
3. श्रीकृष्णविजयस्य कर्ता कः? तस्मिन् कति सर्गाः सन्ति?
4. क्रिस्तुभागवतं कस्य कृतिः? कति सर्गाः सन्ति?
5. भासरुपकाणि नामतः निर्दिशत।
6. नारायणीयं कस्य कृतिः? तस्मिन् कति दशकानि सन्ति?
7. श्रीकृष्णकर्णामृतस्य कर्ता कः?
8. कुबेरन् नम्पूतिरिप्पाट् महोदयस्य कृतयः नामतः लिखत।
9. करग्रहणवर्जमुदूढवान् सः। कः? काम्?
10. पालकेन बद्धः बालकः कः?

**II.** ससन्दर्भं **चत्वारि** व्याख्यात - **(4 × 2 = 8)**

Annotate any **Four** :

11. लावण्यरत्ननिकषं नगरं व्यराजि।
12. प्रत्यक्रमप्रवणविक्लवमाततान।
13. सासीत्सतीकुलललामसमा च धूता।
14. कान्तानुरुपसमधर्मपरा कुलस्त्री।

15. सर्वाबलागणललामतुलां जगाम।

16. चौर्येण खिन्नमनुनेतुमियेष मार्गम्।

III. त्रीणि व्याख्यात । (3 × 3 = 9)

Explain fully any **Three**

17. तं दुर्विनीतनिजमन्त्रिसखं जनौघा:
कालक्रमेण विवेश किल नाद्रियन्त।
को वा क्षमेत कठिनातपतप्तमार्ग -
यात्रां चिरं मरुमरीचिकयातितृप्तः।।

18. स्यालेन पालकनृपस्य सुदुर्मदेन
संस्थानकेन मदनातुरचेतसा सा।
संपीडितातिकरुणं बत चारुदत्तम्
लब्ध्वाप निर्वृतिमनन्यगतिः कृशाङ्गी।।

19. इत्थं तयोर्विगदितं रहसि प्रवृत्तं
श्रुत्वा नितान्तमुदिताथ वसन्तसेना।
तेनार्पितं स्वधनमेव तदीयजाया -
दास्यस्य निष्कृतिकरं व्यदधात्सती सा।।

20. ज्ञात्वा तदात्मदयितस्य सुतं रुदन्तं
धात्रीमपृच्छदधुना किमसावभीप्सुः।
सा चाह मृच्छकटिकं धिगयं करोति
क्रीडन् सुवर्णशकटेन समीपगेहे।।



21. सा तं दशाननमिवामरलोकरम्भा
कृष्णेव कीचकमवेक्ष्य नितान्तभीता।
तत्प्रार्थनामतिगणय्य निरुध्यमाना
दुस्थां दधावहिबिलाख्यसमामवस्थाम्।।

IV. त्रयाणां लघूपन्यासं लिखत। (3 × 3 = 9)

Write short essay on any **three** :

22. चारुदत्तं वर्णयत।

23. पालकेन राज्यं शासितारि तत्रत्यानां जनानामवस्थां वर्णयत।

24. संस्थानकेन कृतं वसन्तसेनानुधावनं विशदयत।

25. वसन्तसेनाचारुदत्तयोः मिथः संभाषणं लिखत।

26. पुष्पवाटीं वर्णयत।

V. एकमधिकृत्य उपन्यस्यत। (1 × 6 = 6)

Write an essay on any **one** of the following :

27. केरलीयसंस्कृतमहाकाव्यान्यधिकृत्य उपन्यासमेकं लिखत।

28. मृच्छकटिककथावस्तु संगृह्यत।

---